# संस्कृतवार्ता:

दिनाङ्क : 05/07/2025 सायम् : 06:20

<u>आदौ-मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्रमोदी स्वकीयाया: पञ्चराष्ट्रिय-यात्रायाः तृतीये चरणे अर्जेण्टीना-देशस्य राजधानीं ब्यूनस् ऐरेस् इति नगरं सम्प्राप्तवान् तत्र; द्वैपाक्षिक-योजनाबद्धसहभागित्वं सुदृढं कर्तुं अद्य सायङ्काले प्रतिनिधि-स्तरीय-वार्ता च भविष्यति।
- भारतं त्रिनिडाड् एण्ड् टोबैगो इत्यनेन सह षट्सन्धिपत्रेषु हस्ताक्षरं करोति येन आधारभूतसंरचनायाः औषधनिर्माणादि च सहितं अनेकेषु क्षेत्रेषु सहकारः वर्धिष्यते।
- वाणिज्योद्योग-मन्त्री पियूष् गोयलः उक्तवान् यत्, सप्तचत्वारिंशदधिकद्विसहस्र-तमवर्षं यावत् राष्ट्रं चतुः ट्रिलियन्-डालर्-अर्थव्यवस्थातः द्वात्रिंशत्- ट्रिलियन्-डालर्-अर्थव्यवस्थां प्रति परिवर्तयितुं भारतस्य नीतयः व्यूहात्मकरूपेण संरचिताः सन्ति इति।
- अमेरिकादेशस्य राष्ट्रपतिः डोनाल्ड् ट्रम्पः स्वकीयं ऐतिहासिकं 'वन् बिग् ब्यूटिफुल् बिल्' इति नीति-विधेयकं विधित्वेन हस्ताक्षरितवान्, येन करह्रासस्य व्यवस्था, रक्षा-व्ययश्च वर्धितम्।
- अद्य बेइजिङ्ग्-नगरे अस्य वर्षस्य एशियन्-च्याम्पियन्शिप् इति क्रीडायां भारतीय-पैरा-आर्चर्स् इति शरसन्धान-क्रीडकाः स्वर्णद्वयं प्राप्तवन्तः।
- किदांबी श्रीकान्तः केनडा ओपन् सूपर् 300 इति बैडमिण्टन् प्रतियोगितायाः पुरुषाणाम् एकलस्पर्धायां उपान्त्यचक्रं प्रविष्टवान्।

<u>-----------------------------------------------</u>

<u>प्रधानमन्त्री-अर्जेण्टिना यात्रा</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य प्रातः स्वस्या: पञ्चराष्ट्रिय-यात्रायाः तृतीये चरणे अर्जेण्टीना-देशस्य राजधानीम् ब्यूनस् ऐरेस्-नगरं प्राप्तवान्। यस्योद्देश्यं ग्लोबल्-साउथ् इत्यनेन सह भारतस्य सम्बन्धं सुदृढं करणमस्ति। अर्जेण्टीनियादेशस्य राजधान्यां आगत्य विशिष्टेन

शास्त्रीयनृत्यप्रदर्शनेन भारतीयसमुदायेन तस्य स्वागतं कृतम्। व्यूहात्मकसहभागित्वं सुदृढं कर्तुं, उभयदेशयोः मध्ये सहयोगस्य नूतनान् मार्गान् उद्घाटयितुञ्च अद्य सायङ्काले प्रधानमन्त्रिणः प्रतिनिधि-स्तरीय-वार्तालापः भविष्यति। प्रधानमन्त्री मोदी गत सायं पोर्ट् आफ् स्पेन्-नगरस्य प्रतिष्ठित-रेड्-हाउस इत्यत्र स्वस्य ट्रिनिडाड्-टोबैगो-समकक्षीयेण कमला-पर्साद्-बिस्सेसर इत्यनया सह विस्तृतं वार्तालापं कृतवान्। वार्तायाः अनन्तरं देशद्वयेन आधारभूतसंरचनायाः औषधनिर्माणादि सहितं अनेकेषु क्षेत्रेषु सहकारं वर्धयितुं षट् सन्धिपत्रेषु हस्ताक्षराणि कृतानि। प्रधानमन्त्री मोदी ट्रिनिडाड् एण्ड् टोबैगो इत्यस्य संसदः संयुक्तसम्मेलनम् अपि समबोधयत्। अस्मिन् अवसरे भाषणं कुर्वन्, श्रीमोदी अवदत् यत्, ग्लोबल्-साउथ् इत्यस्मै उच्चस्तरीयं योग्यस्थानञ्च दातुं भारतं स्वसहभागिभिः सह कार्यं करिष्यतीति।

प्रधानमन्त्री नरेन्द्रमोदी अस्मिन् मासे षडथसप्तदिनाङ्कयोः ब्राज़िल्-देशस्य रियो-डि-जनेरो-नगरे ब्रिक्स्-शिखरसम्मेलने भागं ग्रहीष्यति। प्रायः षट् दशकेषु भारतीयप्रधानमन्त्रिणः ब्राज़िल्-देशस्य एषा प्रथमा यात्रा भविष्यति। भ्रमणकाले श्रीमोदी ब्राजील्-देशस्य राष्ट्रपतिना लूयिस् इनासियो लुला डा सिल्वा इत्यनेन सह अन्यैः वैश्विकनेतृभिश्च सह वार्तालापं करिष्यति।

------------------------------------------------

<u>बेङ्गलूरु केन्द्रीयमन्त्री</u>

भारतस्य नीतयः व्यूहात्मकरूपेण संरचिताः सन्ति येन सप्तचत्वारिंशदधिक- द्विसहस्रतमवर्षं यावत् राष्ट्रम् चतुर्ट्रीलियन-डॉलर इत्यतः द्वात्रिंशत् ट्रीलियन डॉलर मितायाम् अर्थव्यवस्थायां परिवर्तयिष्यतीति वाणिज्योद्योगमन्त्री श्रीपीयूषगोयलः अवदत्। श्रीगोयलः अद्य बेङ्गलूरुनगरे आयोजिते IIT मद्रास इत्यस्य 'संगम पञ्चविंशत्यधिक द्विसहस्र' तमवर्षस्य ग्लोबल इनोवेशन एण्ड् एलुमनीति शिखरसम्मेलने प्रवदन् आसीत्।

------------------------------------------------

<u>मुरुगन-केरल-यात्रा</u>

सूचना-प्रसारण-संसदीयकार्य-राज्यमन्त्री एल्. मुरुगन् इत्येषः अवदत् यत्, देशस्य सामान्यजनेभ्य उत्तम-चिकित्सा-सुविधाः प्रदातुं आयुष्मान्-भारत-योजना अतीव लाभप्रदा अस्तीति। अद्य तिरुअनन्तपुरम्-नगरे श्रीउथ्राडोम् तिरुनाळ् आयुर्विज्ञानसंस्थानस्य चतुर्दशं

दीक्षान्तसमारोहं उद्घाटयन् सः उक्तवान् यत् देशे चिकित्सा-महाविद्यालयानां सङ्ख्या गतदशवर्षेषु द्विगुणाधिक्येन प्रायः वर्धितास्ति। सः अवदत् यत् भारते स्वास्थ्य-व्यवस्था अन्ताराष्ट्रिय-मानकानुरूपम् च अस्तीति।

------------------------------------------------

<u>अमित शाह-गुजराततः</u>

केन्द्रीय-गृह-सहकारिता-मन्त्री अमितशाहः अद्य गुजरातस्य आनन्द-नगरे देशस्य प्रथम-सहकारिता-विश्वविद्यालयलेन त्रिभुवन-सहकारी-विश्वविद्यालयस्य शिलान्यासं कृतवान्। कार्यक्रमावसरे श्रीशाहः अवदत् यत् गतचतुर्वर्षेषु सहकारमन्त्रालयेन षष्टिः नूतनानि उपक्रमाणि प्रारब्धानि। सहकारमन्त्रालयस्य स्थापना कोटिशः निर्धनानां ग्रामीणानाञ्च जीवने आशां जनयितुं अभवदिति।

एतदतिरिच्य, अयं विश्वविद्यालयः न केवलं सहकारिणः कर्मचारिणः, अपि तु त्रिभुवनभाईति सदृशाः समर्पिताः सहकारनेतारः अपि सज्जीकर्तुं शक्नोति, ये सहकारिक्षेत्रस्य अध्ययनं कृत्वा नेतृत्वं च करिष्यन्ति इति श्रीशाह अवदत्।

कार्यक्रमावधौ, श्रीशाहः सहकार-मन्त्रालयस्य तथा एन्. सी. ई. आर्. टी. इत्यस्य सहयोगेन विद्यालयीय- छात्रेभ्यः निर्मितस्य सहकारस्य विषये विशेषस्य द्विभाषीयस्य माड्यूल् इत्यस्य अनावरणमप्यकरोत्।

------------------------------------------------

<u>यू एस्-बिग्-ब्यूटिफुल्-लॉः</u>

संयुक्तराज्यामेरिकादेशस्य राष्ट्रपतिना डोनाल्ड् ट्रम्प् इत्यनेन 'वन् बिग् ब्यूटिफुल् बिल्' इति नाम्ना प्रसिद्धं स्वस्य ऐतिहासिकं नीति-विधेयकं विधिरूपेण हस्ताक्षरितम्। विधिरयं राष्ट्रपति-ट्रम्प् इत्यस्य कार्यसूच्याः प्रमुखान् भागान् प्रवर्तयति, यथा करह्रासः, रक्षाव्ययाभिवर्धनम्, अप्रवासिनः दमनञ्चेति। व्हाइट्-हाउस् इत्यत्र आयोजितः हस्ताक्षर-कार्यक्रमः ह्यः वाशिङ्ग्टन्-डी. सी. इत्यत्र स्वातन्त्र्य-दिवसस्योत्सवेन सह सम्बद्धः आसीत्।

-----------------------------------------------

उत्तराखण्ड-मानसरोवर-यात्रा

उत्तराखण्ड्-राज्ये मुख्यमन्त्री पुष्कर् सिङ्घ् धामी इत्येषः अद्य चम्पावत्-मण्डलस्य टनकपुर्-नगरात् कैलास्-मानसरोवर्-यात्रायाः प्रथमसमूहं ध्वजप्रदर्शनपूर्वकं प्रेषितवान्। देहल्याः प्रस्थितः समूहः ह्यः सायङ्काले टनकपुरमिति प्रथमस्थानं प्राप्नोत्। अस्मिन् समूहे गुजरात- दिल्ली- राजस्थान- महाराष्ट्र- उत्तरप्रदेश- पश्चिमबङ्गाल- तेलङ्गाना- छत्तीसगढादिभ्यः प्रायः पञ्चाशत् तीर्थयात्रिणः सन्ति। अवसरेऽस्मिन् मुख्यमन्त्री अवदत् यत् तीर्थयात्रिकाणां सुरक्षायै सौख्याय च सर्वाः व्यवस्थाः कृताः सन्तीति।

-----------------------------------------------

मानसरोवर यात्रा

कैलास्-मानसरोवर्-यात्रायाः चतुर्थः समूहः अद्य सिक्किम्-राज्यस्य शेरथाङ्ग्-नगरं पारिस्थित्यानुकूलनाय प्राप्नोत्। अयं समूहः अस्य मासस्य द्वितीय- दिनाङ्के देहल्याः प्रस्थित्वा तस्मिन् एव दिने बाग्डोग्रा-नगरं प्राप्नोत्। अस्मिन् दले चतस्रः यात्रिकाः, द्वौ सम्पर्काधिकारिणौ, आई. टि. बि. पि. इत्यस्य एकः अधिकारी, चत्वारः सहायक-कर्मचारिणश्च सन्ति।

-----------------------------------------------

पैरा- च्याम्पियन्शिप्

अद्य बेइजिङ्ग्-नगरे अस्य वर्षस्य एशियन्-च्याम्पियन्शिप् इति क्रीडायां भारतीय-पैरा-आर्चर्स् इति शरसन्धान-क्रीडकाः स्वर्णपदकद्वयं प्राप्तवन्तः।

-----------------------------------------------

बैडमिन्टन्:

बैडमिण्टन्-क्रीडायां भारतस्य किदांबी श्रीकान्तः केनडा-ओपन् सूपर्-300 इति बैडमिण्टन्-प्रतियोगितायाः पुरुष-एकलस्य उपान्त्यचक्रं प्राविशत्। श्रीकान्तः अद्य रात्रौ अन्तिमस्पर्धायां

स्थानं प्राप्तुं जापान्-देशस्य केण्टा निशिमोतो इत्यनेन सह क्रीडिष्यति। महिलैकल-क्रीडायाञ्च भारतस्य श्रीयांशी वालिशेट्टी प्रथमक्रीडायां विजयं प्राप्य डेन्मार्क्-देशस्य अमाली शुल्ज् इत्यनया सह निकटस्पर्धायां पराजिता अभवत्।

---------------------------------------------------

क्रिकेट्

क्रिकेट्-क्रीडायां एकस्तोभस्य हानौ चतुष्षष्टिः धावनाङ्कादारभ्य बर्मिंघम्-नगरस्य एज्बास्टन्-क्रीडाङ्गणे आतिथेय-इङ्ग्लेण्डदलं विरुध्य द्वितीय-निकषस्पर्धायाः उपान्त्यदिने, भारतं द्वितीय-पार्यां भोजनावकाशं यावत् स्तोभत्रयस्य हानौ सप्तसप्तत्युत्तरैकशतं धावनाङ्कान् व्यरचयत्। एण्डर्सन्-तेण्डुल्कर्-ट्रोफीति पञ्चक्रीडन-श्रृङ्खलायां एकशून्याङ्कान्तरालेन इंग्लैण्डदलाम् अग्रे अस्ति।

---------------------------------------------------

हिमाञ्चले ऋतुः

हिमाचलप्रदेशे, वृष्टिकालस्य वर्धितक्रियाकलापैः आगामिनि पञ्चदिनानि यावत् प्रचण्डतोधिकवृष्टिः भवितुं शक्नोतीति शिमला-नगरस्य हवामान-केन्द्रेण पूर्वसूचितमस्ति। गतमासस्य विंशति दिनाङ्के हिमाचलप्रदेशं प्रविशन् वृष्टिकालः सम्पूर्णे राज्ये सामान्यजीवनं तीव्रतया बाधितवान्। अस्मिन् काले मेघस्फोटैः, आकस्मिकजलप्लावनेन, भूस्खलनेन च अनेकाः घटनाः अभवन्, येन धनजीवनयोः क्षतिः अभवत्।

।। इति वार्ता: ।।